इति युक्तिकल्पतरुः ॥*॥ मणिविशेषाणां लक्षणानि तत्तच्छब्दे द्रष्टव्यानि ॥*॥ काव्यालङ्कारः। स द्विविधः। शब्दालङ्कारः १। अर्थालङ्कारश्च २। तस्य लक्षणं। काव्यशोभाकरधर्म्मः। इति काव्यादर्शः॥ वैचित्र्यमलङ्कार इत्यलङ्कारसामान्यलक्षणं। वैचित्र्यञ्च भङ्गीविशेषः प्रतीतिसाक्षिकः। इति काव्यप्रकाशटीकायां महेश्वरः॥ अङ्गदादिवत् शब्दार्थशोभातिशयजनको रसाद्युपकारकोऽस्थिरधर्म्मः। इति साहित्यदर्पणं॥ अस्य विवरणं दण्डि-काव्यप्रकाश-साहित्यदर्पणालङ्कारकौस्तुभ-चन्द्रालोकोज्ज्वल-नीलमणि-काव्यचन्द्रिका-कुवलयानन्द-सरस्वतीकण्ठाभरणादिग्रन्थेषु ज्ञेयं। अलङ्काराणां मध्ये ये ये प्रसिद्धास्तेषां नामलक्षणोदाहरणानि चन्द्रालोकधृतानि तदतिरिक्तानि साहित्यदर्पणोक्तानि च लिख्यन्ते॥

| अथालङ्कारनामानि | तल्लक्षणानि | तदुदाहरणानि |
|---|---|---|
| अक्रमातिशयोक्तिः—१ | “अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्य्ययोः।१ | “आलिङ्गन्ति समं देव ज्यां शराश्च परांश्च ते”॥१ |
| अतद्गुणः—२ | “सङ्गतानुगुणासङ्गीकारमाहुरतद्गुणं”।२ | “चिरं रागिणि मच्चित्ते निहितापि न रज्यसि”॥२ |
| अत्यन्तातिशयोक्तिः—३ | “अत्यन्तातिशयोक्तिस्तु कार्य्ये हेतुप्रशक्तिजे”।३ | “यास्यामीत्युदिते तन्व्या वलयोऽभवदूर्म्मिका”॥३ |
| अत्युक्तिः—४ | “अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं”।४ | “त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः”॥४ |
| अधिकं—५ | “अधिकं पृथुलाधारादाधेयाधिक्यवर्णनं”।५ | “ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः”॥५ |
| अनन्वयः—६ | “उपमानोपमेयत्वं यदेकस्यैव वस्तुनः”।६ | “इन्दुरिवेन्दुः श्रीमानित्यादौ तदनन्वयः”॥६ |
| अनुकूलं—७ | “अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत्।७ | “कुपितासि यदा तन्वि निधाय करजक्षतं।<br>बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा”॥७ |
| अनुगुणः—८ | “प्राक्सिद्धः स्वगुणोत्कर्षोऽनुगुणः परसन्निधेः”।८ | “नीलोत्पलानि दधते कटाक्षैरतिनीलतां”॥८ |
| अनुज्ञा—९ | “दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्”।९ | “मय्येव जीर्णतां यातु यत्त्वयैव कृतं हरे।<br>नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति”॥९ |
| अनुप्रासः—१० | “अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्”।१० | “आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान्।<br>अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः”॥१० |
| अनुप्रासस्तु पञ्चविधः। एकस्य लक्षणोदाहरणे उक्ते। | “अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा।<br>एकस्य सकृदप्येष वृत्त्यनुप्रास इष्यते”॥ | “उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीड़त्-<br>कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।<br>नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-<br>प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः”॥ |
| अपरे यथा, वृत्त्यनुप्रासः— | | |
| श्रुत्यनुप्रासः— | “उच्चार्य्यत्वाद्यदेकत्र स्थाने तालुरदादिके”।<br>सादृश्यं व्यञ्जनस्यैतत् श्रुत्यनुप्रास उच्यते॥ | “दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।<br>विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः”॥ |
| अन्त्यानुप्रासः— | व्यञ्जनञ्चेद्यथावस्थं सहाद्येन स्वरेण तु।<br>आवर्त्त्यतेऽन्त्ययोज्यत्वादनुप्रासः स एव तत्”॥ | “केशः काशस्तवकविकाशः कायः प्रकटितकरभविलासः। चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पं”॥ |
| लाटानुप्रासः— | “शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः।<br>लाटानुप्रास इत्युक्तः”॥ | “स्मेरराजीवनयने नयने किं निमीलिते।<br>पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियं”॥ |
| अनुमानं—११ | “अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्”।११ | “जानीमहेऽस्याः किल सारसाक्ष्या विराजतेऽन्तःप्रियवक्त्रचन्द्रः। तत्कान्तिजालैः प्रसृतैस्तदङ्गेष्वापाण्डुता कुड्मलताक्षिपद्मे”॥११ |
| अन्योन्यं—१२ | “अन्योन्यं नाम यत्र स्यादुपकारः परस्परं”।१२ | “त्रियामा शशिना भाति शशी भाति त्रियामया”॥१२ |
| अपह्नवातिशयोक्तिः—१३ | “रूपकातिशयोक्तिः स्यान्निगीर्य्याध्यवसानतः।<br>यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता”।१३ | “त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ”॥१३ |
| अप्रस्तुतप्रशंसा—१४ | “अप्रस्तुतप्रशंसा स्यात् सा यत्र प्रस्तुताश्रया”।१४ | “एकः कृती स कृत्येषु योऽन्यं शक्रान्न याचते”॥१४ |
| अभिधाहेतुः—१५ | “अभेदेनाभिधाहेतुर्हेतोर्हेतुमता सह”।१५ | “तारुण्यविलासः। इत्यत्र वशीकरणहेतुर्नायिकावशीकरणत्वेनोक्ता। विलासहासयोस्त्वध्यवसायमूलोऽयमलङ्कारः”॥१५ |
| अर्थान्तरन्यासः—१६ | “उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः”।१६ | “हनूमानब्धिमतरत् दुष्करं किं महात्मनां॥<br>गुणवद्वस्तुसंसर्गात् याति स्वल्पोऽपि गौरवं।<br>पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्य्यते”॥१६ |
| अर्थापत्तिः—१७ | “दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते।<br>क्वचित् प्राकरणिकादप्राकरणिकार्थस्यापतनं।<br>क्वचित् अप्राकरणिकात् प्राकरणिकार्थस्येति द्वौ भेदौ”।१७ | “हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले।<br>मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः”॥<br>“विललाप सवाष्पगद्गदं सहजामप्यपहाय धीरतां। अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणां”॥१७ |